M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. 1169

Title: Shree Sukta Vidhi

1169

Complete

C

Shree Sukta Vidhi : Title

: Author

: Editor

S/C : Year, Vols.

: Publisher

1169 : Remarks

2

श्रां श्रीं श्रूं श्रैं श्रौं श्रः षड्दीर्घसंयुतेनैव करांगुलिषडंगकं· सरसिजनिलयेथ ध्यानं कुर्याद्विचक्षणः· मूलेनैव त्रेथवा कार्यंत
र्पणं विधिवन्नरैः· प्रतिनामो क्रमात नमश्चतुर्थ्या च नमोंतया· तर्पयामीति संयोज्य पल्लवं प्रतिनामके· श्रियै लक्ष्म्यै महालक्ष्म्यै
वरदायै ततः परं· विष्णुपत्न्यै ततश्चैव स्कंदमात्रे ततो वदेत्· हिरण्यरूपायै स्वर्णमालिन्यै रजतस्रजा· स्वर्णगेहा तथा स्वर्णप्राका
रा पद्मवासिनी· पद्मरागा पद्मप्रिया लेश्वर्या मुक्तिदा तथा· भुक्तिदा मुक्तिदा ऋद्धिदा च समाधिदा· तुष्टिदा पुष्टिदा चैव
धनदा च धनेश्वरी· श्रद्धा भोगिनी चैव भोगदा धात्रिरेव च· विधात्री सिंधुजा चैव राजलक्ष्म्यै ततः परं· गजांतलक्ष्म्यै सा
म्राज्यलक्ष्मीरिति च तर्पयेत्· ततोदकेन चात्मानं प्रसिंचेत् मूलमंत्रकैः· अथ प्रयोगान्सम्यक्च प्रसन्नं प्रवदाम्यहं· हिरण्यव
र्णामित्य ऋचा हिरण्यप्राप्तये हुनेत्· पंचकैश्च त्रिमध्वक्तैः पीतवर्णैः सुगंधिभिः· तांम आवह जातवेदो गोश्व दास समृद्धये·
पुंनागनागचंपेश्च केसरेण हुनेत्तथा· तृतीयया ऋचा चैव रथरत्नसमृद्धये· श्रीखंडागरुकर्पूरैर्हुनेत्सस्यं न संशयः॥
ऋचा चतुर्थ्या चाथ हेमरोप्यसमृद्धये· हुनेत्तत्र समायुक्तः समधुत्रयसर्पिषा· हुनेच्चाथ पंचम्या ह्यलक्ष्मीनाशयेत्ततः॥
केवलेन तिलाज्येन यथाशक्त्या समाहितः ऋचा षष्ठ्या ततश्च बिल्वपुष्पफलैस्तथा· अलक्ष्मीपरिहाराय त्रिमध्वक्तैः कृशा
नैः हुनेच्चाथ सप्तम्या यशःकीर्तिविवृद्धये· शतपत्रैर्जपाजातिकुसुमैस्त्रिमधुप्लुतैः· अथाष्टम्या ऋचा चैव कुलक्षुत्तालक्ष्मि
नाशने· श्वेतैस्तिलैः सरोजैश्च साज्यैर्मातुलपत्रकैः· लक्ष्मीप्रसादनार्थाय नवम्या ऋचा हुनेत्· पद्मैर्मातुलजैर्द्रव्यैः सर्पिम
धुसितासितैः ऋचा दशम्या पत्नेन हुनेत्पाटलिपुष्पकैः· कदलीफलखाद्यैश्च शोभां वरविवृद्धये· एकादश्या ऋचा चैव सर्वसं
पत्समृद्धये· नारिकेलैश्च पनसफलैर्द्राक्षैस्त्रिमधुसंयुतैः· द्वादश्याथ ऋचा धीमान् धान्यादिकसमृद्धये· व्रीहिभिश्च यवैस्तद्
क्रोधूमैस्त्रिमधुप्लुतैः त्रयोदश्या ऋचा चैव चतुर्दश्या तथैव च· पंचदश्या ऋचा चैव पुत्रबंधुसमृद्धये· देशग्रामपुरप्राप्त्ये

तथात्वंनसमृध्यये· पद्मरागैर्मधुरैश्चैवमधुनितमसंयुतैः· दध्नाक्षीरेणवाप्रोक्तालवंगेलासुपत्रिका· जटामांसीवीरणश्चलोहबाण
स्तथैवच· नवनीतंमातुलिंगंसर्वमत्तंसुमनोहरं· राज्यसाम्राज्यमपत्निप्राप्त्ययेबुद्धिपूर्वकं· कुर्नेत्तमस्तमुक्तेनयथाशक्त्यया
न्वितः· संपूर्णमानसोहस्तानिस्तंद्राविवर्जितः· नास्तिकादिसमुद्भरेशैद्रस्थश्चवाचनरः· सदातुष्टःसदाहृष्टःसदाभोक्ता
ससंयुतः· सलभेत्सर्वसाम्राज्यसमृध्धीःसत्वरंनरः· निर्भीतिर्निर्विकारोपिनिराशोपरयाचकः· नित्यप्रदानशक्तिश्चनि
त्यहृष्टोह्यलोलुपः· भवत्येवंविधःसत्यंपुरुषोनात्रसंशयः· श्रीसूक्तस्यप्रभावाद्धिविजयीचापराजितः· भोगेनोना
विधैर्नित्यंसमृध्योनरपुंगवः· कलत्रपुत्रादिसुहृद्बंधुसमावृतः· वसतेमंगलेश्रीमान्दानधर्मरतःसदा· पुण्यकीर्ति
विपाप्मानंचिरलक्ष्मीसमावृतः· अनेनविधिनाकुर्वन्श्रीसूक्तस्यविधिंस्फुटं· इप्सितंलभतेससमहालक्ष्म्याःप्रसादतः·
हृष्टप्रसन्नमेवंत्रिकालंवापियःपठेत्· सोपिलक्ष्मीपुनोभावीमत्यंसत्यंनसंशयः· मुनिभिर्गदितंकल्पंवद्गीरिवनान्यथा·
षट्कोणंवसुपत्रंचततःषोडशपत्रकं· द्वात्रिंशद्दलकंपद्मंतद्बाह्येचचतुर्दलं· श्रीबीजमंडलंकोणेतंशतपंचाशदुत्तरं· सर्वमांगल
मांगल्यसाम्राज्यश्रीसुमंदिरं· पुंसोहन्निमतीनित्यंसुस्थिरावसतेध्रुवं· कर्णिकायांलिखेद्बीजंश्रींबीजंसुमनोहरं· षट्को
णेषुषडंगानिव्युत्क्रमेणालिखेत्सुधीः· कनकाभरणापूर्वंतथामंगलरूपका· सर्वरत्नमंडनाश्चसर्वलोकप्रहर्षिणी·
ततःपरासमुद्दिष्टमुक्ताजालविभूषणा· अंतरालेषुसंलेख्याश्चतुर्ध्यंताश्चसंधिगा· श्रीलक्ष्मीवरदाचैवविष्णुपत्नी
ततःस्मृता· नवकोटिप्रमोदाचसुप्रजासमुदीरिता· हिरण्यवर्णाथस्वर्णमालिनीचाष्टमीमता· अष्टपत्रेषुसंलेख्यास्ततः
संधिदलेलिखेत्· रत्नमालांसमालेख्यातथ्यैवसमालिखेत्· स्वर्णगृहातथास्वर्णप्राकाराप्रभवालिनी· पद्मरा
गापद्मप्रियातथैश्वर्यविवर्धिनी· भुक्तिमुक्तिप्रदाचैवततःषोडशपत्रके· सन्मुक्तिदाविभूतिदाऋद्धिदाचसमृ
ध्दिदा· तुष्टिदापुष्टिदाचैवधनदाचधनेश्वरी· श्रद्धाचभोगिनीचैवभोगदाधात्रिरेवच· विधात्रीसिद्धिजाचै
वैववरण्यात्वततःपरं· महालक्ष्मीस्ततश्चैवततःसंधिदलेलिखेत्· कल्याणवर्धिनीचैवस्वर्गराजसुसेविता·

अथदलादिवामावर्त्तेन

गणेशसेविताचैवतथाचधनदस्तुता· स्कंदस्तुताचंद्रप्रभातथाचक्षत्रमंडला· जयवर्धनाकल्याणरंगाज्ञानविवर्धिनी· तिलक
विभूषणाचैवठकारवेष्टनाततः· डिंडिमनादप्रियाचठकारवीणूपुरातथा· विद्युद्विलसिताचैवततस्तोषविवर्धिनी· द्वात्रिंशद्द
लमध्येषुतथैवाविलिखेदिमाः· स्थूलसंशोभिताचैवदेवराजसुसेविता· धनप्रदाथनयनानंददापद्मसंभवा· स्फुररूपाबो
धप्रदानयहारिण्यतःपरं· मानसाह्लाददाचैवततोयजनतुष्टिका· रत्नसंशोभितालेख्यानाथसंसेविताततः· वराहनु
पावृशिवावशिनीपरिकीर्तिता· पट्टपद्मसंस्थितासर्वासर्वोत्साहविवर्धिनी· साम्राज्यपददाचैवसर्वसंपत्तिदाततः·
सर्वप्रकाशरूपाचप्रोक्ताकनकरत्नभा· सर्वसंमूलभूताचसर्वशक्तिस्वरूपका· अणिमामहिमाचैवलघिमाग
रिमातथा· प्राप्तिःप्राकाम्यमीशिताचवशितातततःपरं· श्रीसूक्तस्यऋचाश्चाथततःसंधिदलेलिखेत्· पुनराद्यऋ
चाष्टदलद्वयेचसंलिखेत्· ततश्चतुर्दलेलेख्यादिशस्त्वष्टगजाःक्रमात्· ऐरावतःपुंडरीकोवामनःकुमुदस्तथा· अं
जनःपुष्पदंतश्चसार्वभौमःसुप्रतीककः· ततस्त्वष्टसमालेख्यानिधयोष्टौतयक्रमात्· महापद्मश्चपद्मश्चशंखो
मकरकच्छपौ· मुकुंदःकुंदनीलश्चचतुर्थ्यंतानमोंतकाः· रमाबीजंसर्वबाह्येमंडलंचसुशोभनं· एतत्संख्यंच
तलेख्यंशतपंचाशदुत्तरं· एतद्यंत्रंस्फुटंविधिश्रीसूक्तस्यविधानके· धार्यपूज्यंप्रयत्नेनभूमध्यगृहमध्यगं·
कृत्वायत्नेनतत्रश्रीर्वसतेसिध्धिसंयुता· सप्तयमयाप्राक्तंविशेषान्नृपमंदिरे· सुस्थिराक्षोभनिर्मुक्ता
सर्वमांगल्यवर्धिनी· सर्वसंपत्प्रदायुक्ताबाधापीडाविवर्जिता· रागद्वेषाथकलहावैरंचापिनतत्रहि· तद्गृ
हेनापिचौराग्निसर्पभूतादिजंभयं· धनधान्यसमृध्धिहिपुत्रपौत्रादिसंयुतं· नंदतेतद्गृहंरम्यंयत्रैतन्निष्ठति
ध्रुवं· किमत्रबहुधाचवजल्पितेनपुनःपुनः· यद्यदीप्सितंमर्त्यश्चितेतत्तत्करोतिनिश्चितं· श्रीकामेनसदापुंसां

गृहमध्येभूमिगतंकलेत्यर्थः· ५

कार्यंधार्यंसुखावहंये · इतिश्रीसूक्तविधिःसंपूर्णः ; यालक्ष्मीःसिंधुसंभवाभ्रलधेनुःपुरूवसुः · १पधाविश्वाच
सुर्देवीसदानोजुषतांगृहेइत्यस्याःयंत्रंगीर्वाणंह्यादौलिखितमस्ति · कांसोस्मितामित्यनेनैकादशगुरुतीर्हुतंत्वा
घृताक्तान्नेनत्रिमधुनावासंपत्तिर्भवति · बिल्वाशीबिल्वनिलयोजुहुन्बिल्वानिसर्पिषा · एकविंशतिरात्रेणपरासृ
द्धिंनियच्छति · ॐ ॐ ॐ अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः अहंमित्रावरुणोभाबिभर्म्यहमिंद्रा
ग्नीअहमश्विनोभा · अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां · तांमादेवाव्यदधुःपुरुत्राभूरिस्थात्रां
भूर्यावेशयंतः · अहमेवस्वयमिदंवदामिजुष्टंदेवानामुतमानुषाणां · यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिं
तंसुमेधां · मयासोअन्नमत्तियोविपश्यतियःप्राणितियईंशृणोत्युक्तं · अमंतवोमांतउपक्षियंतिश्रुधिश्रुत
श्रद्धेयंतेवदामि · अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ · अहंजनायसमदंकृणोम्यहंद्यावापृथिवीआ
विवेश · अहंसोममाहनसंबिभर्म्यहंत्वष्टारमुतपूषणंभगं · अहंदधामिद्रविणंहविष्मतेसुप्रा
व्यायजमानायसुन्वते · अहंसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वंतःसमुद्रे · ततोवितिष्ठेभुवनानिविश्वो
तामूंद्यांवर्ष्मणोपस्पृशामि · अहमेववातइवप्रवाम्यारभमाणाभुवनानिविश्वा · परोदिवापरएनापृ
थिव्यैतावतीमहिम्नासंबभूव · इत्यथर्वणवेदीसूक्तं ·